नं० ८१६-घ

का० ख०

वानरीवानराष्टकद्वयम्

नं० ८१९-घ

२५-२

त्वां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥१३॥ चंद्रोद्भासितशेखरे स्मरहरे गंगाधरे शंकरे सर्पै
र्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे। दंतित्वक्कृतसुंदराम्बरधरे त्रैलोक्यसारे हरे मोक्षा
र्थं कुरु चित्तवृत्तिममलामन्यैस्तु किं कर्मभिः ॥१४॥ किं दानेन धनेन वाजिकरिभिः प्राप्तेन राज्येन
किं किं वा पुत्रकलत्रमित्रपशुभिर्देहेन गेहेन किं। ज्ञात्वैतन्नू क्षणभङ्गुरं सपदि रे त्याज्यं मनो दूरतः
स्वात्मार्थं गुरुवाक्यतो भज भज श्रीपार्वतीवल्लभं ॥१५॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रव
णनयनजं वा मानसं वापराधं। विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्री
महादेव शंभो ॥१६॥ गात्रं भस्मसितं सितं च हसितं हस्ते कपालं सितं खट्वाङ्गं च सितं सितश्च
वृषभः कर्णे सिते कुंडले। गंगाफेनसितं जटा पयसितं चंद्रः सितो मूर्द्धनि सोऽयं सर्वसितो
ददातु विभवं पापक्षयं शंकरः ॥१७॥ ॥ इति श्रीपरमहंसपरिव्राजकाचार्य्य श्रीशंकराचा
र्य्यभगवत्कृतमपराधभञ्जनस्तोत्रं समाप्तं ॥ । ॥

नीति रत्नं ९

चतुर्मुखमुखांभोजशृंगाटकविहारिणी। नित्यप्रगल्भवाचालामुपतिष्ठसरस्वती ॥ १॥
इतरपापफलानि यथेच्छया वितर तानि सहे चतुरानन। अरसिकेषु कवित्वनिवेदनं
शिरसि मा लिख मा लिख मा लिख ॥२॥ संसारविषवृक्षस्य द्वे फले अमृतोपमे। काव्या
मृतरसास्वाद आलापः सज्जनैः सह ॥३॥ पंडितेषु गुणाः सर्वे मूर्खे दोषाश्च केवलाः।
तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥४॥ पुरो रेवा पारे गिरिरतिदुरारोहशिखरो
धनुर्वाणैः पश्चात्स्वरकरो धावति मृगं सरः सव्ये सव्ये दवदहनदाहव्यतिकरो। न गं
तुं न स्थातुं हरिणशिशुरेवं विलपति ॥५॥ छेदश्चंदनचूतचंपकवने रक्षा करीरद्रुमे
हिंसा हंसमयूरकोकिलकुले काकेषु लीलारतिः। मातंगेन खरक्रयः समतुला कर्पू
रकार्पासयोः एषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥६॥ भिनत्ति भीमं
करिराजकुंभे बिभर्ति वेगं पवनादतीव करोति वासं गिरिगह्वरेषु तथा सिंहः पशुरे
व नान्यः ॥७॥ काकस्य चंचुर्यदि स्वर्णयुक्ता माणिक्ययुक्तौ चरणौ च तस्य। एकैक ९

पद्मेगजराजमुक्ता तथापिकाकीनचराजहंसः ८ दिव्यं चूतरसंपीत्वा नगर्वंयातिकोकिलः ।
पीत्वा कर्दमपाणीयं भेको मकमकायते ।९। अगाधजलसञ्चारीनगर्वंयातिरोहितः ।
अङ्गुष्ठोदकमात्रेण सफरीफर्फरायते ।१०। भद्रं कृतंकृतंमौनं कोकिलैर्जलदागमे । दर्दु
रायत्रवक्तारस्तत्रमौनंहिशोभनं ११ मणिर्लुठतिपादेषु काचःशिरसिधार्यते । यथैवास्त
तथैवास्तांकाचःकाचोमणिर्मणिः १२ काकःकृष्णःपिकःकृष्णःकोभेदःपिककाकयोः
वसंतेसमुपायातेकाकःकाकःपिकःपिकः १३ वरंवने व्याघ्रगजेंद्रसेवितंद्रुमालयं पत्र
फलाम्बुभोजनं तृणानिशय्यावसनंचवल्कलंनबंधुमध्येधनहीनजीवनं १४ साध्वीस्त्री
णांदयितविरहे मानिनांमानभङ्गः सल्लोकानामपिजनरवे निग्रहे पंडितानां । अन्योद्रेके
कुटिलमनसा निर्गुणानांविदेशे भृत्याभावेभवतिमरणं किंतुसंभाविनानां ।।१५।।

इति श्रीमहाकविवररुचिविरचितं नीति
रत्नं सम्पूर्णम् ।।ss।।

नीति सारं १

ॐ ॥ चतुर्मुखमुखांभोजशृंगाटकविहारिणी। नित्यप्रगल्भवाचालामुपतिष्ठे
सरस्वती ॥१॥ इतरपापफलानि यथेच्छया वितर तानि सहे चतुरानन। अरसिकेषु क
वित्वनिवेदनं शिरसि मालिख मालिख मालिख ॥२॥ ॥ ॥ ॥

नीतिसार ॥ ॥ गिरौ कलापी गगने पयोदा
लक्षान्तरेऽर्कश्च जलेषु पद्माः। इन्दुर्द्विलक्षं कुमुदस्य बन्धुः यो यस्य मित्रं न हि तस्य दूरं ॥१॥
माता निंदति नाभिनंदति पिता भ्राता न संभाषते भृत्यः कुप्यति नानुगच्छति सुतः कांता च
नालिंगते। अर्थाप्रार्थनशंकया न कुरुतेऽप्यालापमात्रं सुहृत् तस्मादर्थमुपार्जयस्व
च सखे ह्यर्थस्य सर्वे वशाः ॥२॥ धनैरकुलीनाः कुलीना भवंति धनैरापदं मानवा नि
स्तरंति धनेभ्यः परो बांधवो नास्ति लोके धनान्यर्जयध्वं धनान्यर्जयध्वं ॥३॥ अर्थस्य पु
रुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज बद्धोस्म्यर्थेन कौरवैः ॥४॥ त्रिवि
क्रमोऽभूदपि वामनोऽसौ स शूकरश्चेति स वै नृसिंहः। नीचैरनीचैरतिनीचनीचैः सर्वैरु

पायैः फलमेव साध्यं ॥५॥ चलच्चित्तं चलद्वित्तं चलज्जीवनयौवनं । चलाचलमिदं सर्वं
कीर्तिर्यस्य स जीवति । अयशोऽकीर्तिसंयुक्तो जीवन्नपि मृतोपमः ॥६॥ वृद्धस्य वचनं ग्रा
ह्यमापत्काले ह्युपस्थिते सर्वत्रैवं विचारेण नाहारेन च मैथुने ॥८॥ क्वचिद्रुष्टः क्वचित्तुष्टो
रुष्टस्तुष्टः क्षणे क्षणे । अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ॥९॥ निमित्तमुद्दिश्य हि
यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति । अकारणद्वेषि मनस्तु यस्य कथं जनस्तं परि
तोषयिष्यति ॥१०॥ दश व्याघ्रा जिताः पूर्वं सप्त सिंहास्त्रयो गजाः । पश्यन्तु देवताः सर्वा अद्य युद्धं
त्वमया ॥११॥ सिंह उवाच ॥ गच्छ शूकर भद्रं ते ब्रूहि सिंहो मया जितः । पण्डिता एव जानन्ति
सिंहशूकरयोर्बलं ॥१२॥ उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥१३॥ एका भार्या
प्रकृतिमुखरा चंचला च द्वितीया पुत्रस्त्वेको भुवनविजयी मन्मथो दुर्निवारः । शेषः शय्या
शयनमुदधौ वाहनं पन्नगारिः स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥१४॥ अतिदूरस्यापि

नीति सारं ११

श्रान्ताच्छायांयांतिचशीतलां । शीतलाम्बुपुनर्याति काकस्यपरिदेवना १५ अपमानंपुरस्कृ
त्य मानंकृत्वाचपृष्ठके । स्वकार्यमुद्धरेत्प्राज्ञः कार्यध्वंसोहिमूर्खता ॥१६॥ पकोहिदोषोगु
णसन्निपाते निमज्जतीन्दोरिति योऽबभाषे । नूनंनदृष्टंकविनापितेन दारिद्र्यदोषोगुण
राशिनाशी ॥१७॥ कृतस्यकरणंनास्ति मृतस्यमरणंतथा । गतस्यशोचनानास्ति ह्येतद्वे
दविदांमतं १८ नाकालेम्रियतेजन्तुर्विद्धःशरशतैरपि । कुशाकंटकविद्धोपिप्राप्तकालोनजी
वति ॥१९। निमग्नस्यपयोराशौ पर्वतात्पतितस्यच । तक्षकेनापिदष्टस्य आयुर्मर्माणि
रक्षति ॥२०॥ करोतुनामनीतिज्ञो व्यवसायमितस्ततः । फलंपुनस्तदेवास्याद्यद्विधेर्मन
सिस्थितं २१॥ इति श्रीमहाकविघटकर्परविरचितं

नीतिसारं समाप्तं ॥

अथ धर्मविवेकः ॥ ॥

११

वानर्यष्टकं ॥ माधुर्यशास्त्रमारोग्यं दानंमूर्खोद्विजातिकः
वैद्यं स्वजीर्णांश्च तत्त्वं वानर्युक्तमिहाष्टकं ॥ माधुर्यप्रमदाजनेषु
ललितं दाक्षिण्यमार्येजने शौर्यंशत्रुषु नम्रता गुरुजने धर्मिष्ठता साधुषु ।
मर्मज्ञेष्वनुवर्तनं बहुविधं मानंजनेपण्डिते शाठ्यं पापिजने नरस्य कथिताः पर्यं
तमष्टौगुणाः १। शास्त्रं सुचिंतितमपि प्रतिचिंतनीयं स्वाराधितोपिनृपतिः परि
शङ्कनीयः। अङ्केस्थितापियुवतिः परिरक्षणीया शास्त्रेनृपेचयुवतौचकुतोवशित्वं ।२।
आरोग्यमानृण्यमविप्रवासः सम्प्रत्ययावृत्तिरभीतिवासः सद्भिर्मनुष्यैः सहसं
प्रयोगः षड्जीवलोकेषु सुखानि राजन् ।३। दानंदरिद्रे विभवेऽपिशांतिर् यूनां
तपोज्ञानवतांश्चमौनं इच्छानिवृत्तिश्च सुखोचितानां दयाचभूतेत्रिदिवंनयंति। ४
मूर्खो द्विजातिः स्थाविरोगृहस्थो गृहीदरिद्रोधनवांस्तपस्वी। वेश्या कुरूपा

वान
र्यष्ट
कं.
२९

न्रपतिः कुधर्मो लोके षडेतानि विडम्बितानि ।५। वैद्यपानरतं नटं कुपठितं
स्वाध्यायहीनं द्विजं युद्धे कापुरुषं हयं गतरसं मूर्खं परिव्राजकं । राजानञ्च
कुमन्त्रिभिः परिवृतं देशाश्च सोपद्रवं भार्या यौवनगर्विता पररता मुञ्चन्ति शीघ्रं
बुधाः ६ सज्जीर्णमन्त्र सुविचक्षणाः स्मृतः । सुचिंत्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेपि नयाति विक्रियां ॥७॥ वृक्षं क्षीणफलं त्यजन्ति विहगाः
शुष्कं सरः सारसाः पुष्पं पर्युषितं त्यजन्ति मधुपा
दग्धं वनान्तं मृगाः । निर्द्रव्यं पुरुषं त्यजन्ति
गणिका भ्रष्टश्रियं मन्त्रिणः सर्वः कार्यवशा
ज्जनोभिरमते कस्यास्तिकोवल्लभः ८॥
इति वानर्यष्टकं समाप्तं ॥

वानराष्टकं ॥ ईर्षी दक्षः क्रतौ रूपं स्तब्धः सुखेन्धनंजवः ।
दुर्मंत्रिणामिति श्लोकाः कथिता वानराष्टके ॥ ॥ ॥

ईर्षी घृणीत्वसन्तुष्टः क्रोधनो नित्यशङ्कितः । परभाग्योपजीवी च
षडेते दुःखभागिनः ॥१॥ दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्युक्तो विद्यां तथा धर्मार्थयशांसि विनीतः ॥२॥ क्रतौ विवाहे व्यसने रिपु
क्षये यशस्करे कर्मणि मित्रसंग्रहे । प्रियासु नारीषु तथैव बांधवेष्वतिव्ययो
नास्ति नराधिपाष्टसु ॥३॥ रूपं जरा सर्वसुखानि तृष्णा खलेषु सेवा पुरुषाभि
मानं याच्ञा गुरुत्वं गुणमात्मपूजा चिंता बलं हन्त्यदया च लक्ष्मी ॥४॥ स्तब्धस्य
नश्यति यशो विषमस्य मैत्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः । विद्याफलं व्यस

पु०८४४

नं. ८१५

वान राष्ट कं. ३ निनः कृपणाश्रयहतं राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥५॥ शुष्केंधने
वह्निरुपैति वृद्धिं बालेषु शोकस्त्वचलेषु कोपः। कांतासु कामो निपुणेषु
चित्तं प्रमोदयावत्सु महत्स्वधैर्यं ॥६॥ जवो हि सप्तेः परमं विभूषणं
त्रपांगनायाः कृशता तपस्विनः द्विजस्य विद्यैव मुनेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनां ॥७॥
दुर्मंत्रिणं कमुपयाति न नीतिदोषाः
संतापयंति कमपथ्यभुजं न रोगाः।
कं स्त्री न मोहयति कं न निहंति मृत्युः
कं स्त्रीकृतान विषयाः परितापयंति ॥८॥
इति वानराष्टकं समाप्तं ॥

३